# Vishvakarmakritam Suryastavanam

# विश्वकर्मकृतं सूर्यस्तवनम्

## Document Information

Text title : Vishvakarmakritam Suryastavanam

File name : vishvakarmakRRitaMsUryastavanam.itx

Category : navagraha, mArkaNDeyapurANa, stava

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : mArkaNDeyapurANa | adhyAya 104/2-11||

Latest update : October 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2024

*sanskritdocuments.org*

# विश्वकर्मकृतं सूर्यस्तवनम्

मार्कण्डेय उवाच ।
लिख्यमाने ततो भानौ विश्वकर्मा प्रजापतिः ।
उद्भूतपुलकः स्तोत्रमिदं चक्रे विवस्वतः ॥ १॥

विश्वकर्मा उवाच ।
विवस्वते प्रणतहितानुकम्पिने महात्मने समजवसप्तसप्तये ।
सुतेजसे कमलकुलावबोधिने नमस्तमः पटलपटावपाटिने ॥ २॥

पावनातिशयपुण्यकर्मणे नैककामविषयप्रदायिने ।
भास्वरानलमयूखशायिने सर्वलोकहितकारिणे नमः ॥ ३॥

अजाय लोकत्रयकारणाय भूतात्मने गोपतये वृषाय ।
नमो महाकारुणिकोत्तमाय सूर्याय चक्षुःप्रभवालयाय ॥ ४॥

विवस्वते ज्ञानमृतेऽन्तरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे ।
स्वयम्भुवे लोकसमस्तचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ ५॥

क्षणमुदयाचलमौलिमणिः सुरगणमहितहितो जगतः ।
त्वमु मयूखसहस्रवपुर्जगति विभासि तमांसि नुदन् ॥ ६॥

भवतिमिरासवपानमदाद्भवति विलोहितविग्रहता ।
मिहिर विभासि यतः सुतरां त्रिभुवनभावनभानिकरैः ॥ ७॥

रथमधिरुह्य समावयवं चारुविकम्पितमुरुरुचिरम् ।
सततमखिन्नहयैर्भगवंश्चरसि जगद्धिताय विततम् ॥ ८॥

अमृतमयेन रसेन समं विबुधपितॄनपि तर्पयसे ।
अरिगणसूदन तेन तव प्रणतिमुपेत्य लिखामि वपुः ॥ ९॥

शुकसमवर्णह्यप्रथितं तव पदपांसुपवित्रतमम् ।
नतजनवत्सल मां प्रणतं त्रिभुवनपावन पाहि रवे ॥ १०॥

इति सकलजगत्प्रसूतिभूतं त्रिभुवनभावनधामहेतुमेकम् ।
रविमखिलजगत्प्रदीपभूतं त्रिदशवर प्रणतोऽस्मि सर्वदा त्वाम् ॥ ११॥

इति श्रीमार्कण्डेयपुराणे चतुरधिकशततमाध्यायान्तर्गतं
विश्वकर्मकृतं सूर्यस्तवनं समाप्तम् ।

मार्कण्डेयपुराण । अध्याय १०४/२-११॥

mArkaNDeyapurANa . adhyAya 104/2-11..

Proofread by PSA Easwaran

*Vishvakarmakritam Suryastavanam*

pdf was typeset on October 22, 2024

Please send corrections to *sanskrit@cheerful.com*